# Shri Dakshinamurtimanusuvarnamalastavah

# શ્રીદક્ષિણામૂર્તિમનુસુવર્ણમાલાસ્તવઃ

## Document Information


Text title : dakShiNAmUrtimanusuvarNamAlAstavaH

File name : dakShiNAmUrtimanusuvarNamAlAstavaH.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



August 30, 2023

*sanskritdocuments.org*

# શ્રીદક્ષિણામૂર્તિમનુસુવર્ણમાલાસ્તવઃ

ઓમિતિ નિખિલા દેવા યસ્યાજ્ઞાં શિરસિ કુર્વતે સતતમ્ ।
ઓઙ્કારપદ્મભૃઙ્ગં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧॥

નત્વા યત્પદયુગ્મં મૂકા અપિ વાગ્વિધૂતગુરવઃ સ્યુઃ ।
નતજનરક્ષણદક્ષં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૨॥

મોહમતઙ્ગજભેદનપઞ્ચાસ્યા યત્પદામ્બુજપ્રણતાઃ ।
મોહાન્ધકારમિહિરં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૩॥

ભવવારિધિમાશુ તરેત્કુલ્યામિવ યત્પદામ્બુજધ્યાનાત્ ।
ભગવત્પદાદિરૂપં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૪॥

ગતિવિજિતહંસગર્વં ગગનમરુદ્વહ્નિજલધરારૂપમ્ ।
ગજમુખષડાસ્યપૂજિતમનિશં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૫॥

વરયન્તેઽખિલવિદ્યાઃ સ્વયમેવ યદઙ્ઘ્રિપદ્મનમ્રજનાન્ ।
વનવાસલોલચિત્તં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૬॥

તેન જિતં જગદખિલં તેનૈવાત્તં સમસ્તભાગ્યં ચ ।
યેન ત્વત્પદયુગલં પૂજિતમપિ જાતુ દક્ષિણામૂર્તે ॥ ૭॥

દમશમમુખાસ્તુ સુગુણાઃ પ્રાપ્યન્તે સત્વરં યસ્ય ।
પાદામ્બુજયુગનમનાત્તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૮॥

ક્ષિતિપતયો દાસાઃ સ્યુર્યત્પાદપાથોજપૂજકસ્યાશુ ।
ક્ષિતિધરશિખરાવાસં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૯॥

ણાણેતિ યન્મનુસ્થં વર્ણં જપ્તુઃ સમસ્તપુરુષાર્થાઃ ।
કરતલમધ્યગતાઃ સ્યુસ્તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૦॥

મૂર્તિં નિરીક્ષ્ય મોહં પ્રાપ્યાગસુતા પુરા તપસ્તેપે ।
યસ્ય પ્રાપ્ત્યૈ સુચિરં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૧॥

તસ્યાણિમાદિસિદ્ધિર્વિનૈવ યોગં ભવેન્ન સન્દેહઃ ।
તરુણેન્દુભૂષિતજટં યસ્ત્વાં નમતીહ દક્ષિણામૂર્તે ॥ ૧૨॥

યે ત્વત્પાદાબ્જયુગલં ચિત્તે સન્દધતિ દક્ષિણામૂર્તે ।
તાન્મત્તવારણેન્દ્રા દધતિ તુરઙ્ગાઃ સુવર્ણશિબિકાશ્ચ ॥ ૧૩॥

મથિતાસુરસન્દોહં માનસચરમદ્રિરાજતનયાયાઃ ।
માનપ્રદમાનમતામનિશં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૪॥

હ્યમ્ભોધૌ લુઠતાં તત્પારં ગન્તું યદીયપદભક્તિઃ ।
સંસૃતિરૂપે નૌકા તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૫॥

મેધાપ્રજ્ઞે ચેટીભાવં વ્રજતો યદઙ્ઘ્રિનતિકર્તુઃ ।
મેનાસખજાકાન્તં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૬॥

ધાં બાપૂર્વાં નિખિલાં યોઽરં વારયતિ ભક્તવૃન્દસ્ય ।
ધામ્નામપિ ધામત્વદમનિશં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૭॥

પ્રજ્ઞામાત્રશરીરં પ્રણતાઘામ્ભોધિકુમ્ભસઞ્જાતમ્ ।
પ્રત્યક્ષં નતવિતતેઃ સતતં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૮॥

જ્ઞાંશીભૂતાઞ્જીવાન્ ભવમગ્નાન્ બ્રહ્મબોધદાનેન ।
કુર્વાણં પ્રવિમુક્તાન્ સતતં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૧૯॥

પ્રણવચસ્તતિગેયં પ્રજ્ઞાદાનપ્રચણ્ડનિજનમનમ્ ।
પ્રણવપ્રતિપાદ્યતનું સતતં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૨૦॥

યસ્યાર્ધવર્ષ્મલાભાદેવાભૂત્સર્વમઙ્ગલા ગિરિજા ।
યમિવરહૃદબ્જનિલયં તમહં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૨૧॥

છત્રીભૂતવટાગં છન્નમવિદ્યાઽઽખ્યવાસસાનાદિમ્ ।
છત્રાદિનૃપવિભૂતિદમનિશં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૨૨॥

સ્વાહાસ્વધાનિષેવ્યં સ્વાકૃતિસન્તોષિતાગજાહૃદયમ્ ।
સ્વાહાસહાયતિલકં સતતં પ્રણમામિ દક્ષિણામૂર્તિમ્ ॥ ૨૩॥

હાસાધરીકૃતવિધું હાલાહલશોભમાનગલદેશમ્ ।
હારાયિતાહિરાજં સતતં પ્રણમામિ દક્ષિણામૂતિમ્મ્ ॥ ૨૪॥

શ્રીમન્નૃસિંહયતિરાટ્શિષ્યઃ શ્રીસચ્ચિદાનન્દઃ ।
અકરોદ્ગુરુવરકૃપયા સ્તોત્રં શ્રીદક્ષિણામૂર્તેઃ ॥ ૨૫॥

મનુવર્ણઘટિતમેતત્સ્તોત્રં યઃ પઠતિ ભક્તિસંયુક્તઃ ।
તસ્મૈ વટતટવાસી દદ્યાત્સકલાઃ કલાસ્ત્વરિતમ્ ॥ ૨૬॥

ઇતિ શૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતઃ શ્રીદક્ષિણામૂર્તિમનુસુવર્ણમાલાસ્તવઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

---

*Shri Dakshinamurtimanusuvarnamalastavah*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*